[1]नद्धा-द्ध्री, नाहयिता-त्री, निनत्सिता-त्री, नानहिता-त्री ;

[2]नह्यन्-न्ती, नाहयन्-न्ती, निनत्सन्-न्ती ; —

नत्स्यन्-न्ती-ती, नाहयिष्यन्-न्ती-ती, निनत्सिष्यन्-न्ती-ती ; —

नह्यमानः, नाहयमानः, निनत्समानः, नानह्यमान ;

नत्स्यमानः, नाहयिष्यमाणः, निनत्सिष्यमाणः, नानहिष्यमाण ;

[3]उपानत्-उपानद्-उपानहौ-उपानहः, प्राणत्-प्राणद्-प्राणहौ-प्राणहः ; —

अपिनद्धम्-[4]पिनद्धः-[A]सुनद्धम्-नद्धवान्, नाहितः, निनत्सितः, नानहितः-तवान् ;

नहः, प्रणाही, नाहः, निनत्सुः, नानह ;

नद्धव्यम्, नाहयितव्यम्, निनत्सितव्यम्, नानहितव्यम् ;

नहनीयम्, नाहनीयम्, निनत्सनीयम्, नानहनीयम् ;

नाह्यम्, नाह्यम्, निनत्स्यम्, नानह्यम् ;

ईषन्नहः-दुर्नहः-सुनहः ; — — —

नह्यमानः, नाह्यमानः, निनत्स्यमानः, नानह्यमानः ;

नाहः, संनाहः-परिणाहः-[5]परीणाहः, नाहः, निनत्सः, नानहः ;

नद्धुम्, नाहयितुम्, निनत्सितुम्, नानहितुम् ;

नद्धिः, नाहना, निनत्सिषा, नानहा ;

नहनम्, [6]प्रणिनहनम्-प्रनिनहनम्, नाहनम्, निनत्सनम्, नानहनम् ;

नद्ध्वा, नाहयित्वा, निनत्सित्वा, नानहित्वा ;

---

1. 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इतीण्णिषेधे, धत्वचर्त्वयोश्च रूपम्। एवं तव्यदादिष्वपि बोध्यम्।

2. 'दिवादिभ्यः—' (3-1-69) इति श्यन् विकरणप्रत्ययः।

3. उपनह्यते=बध्यते इति उपानत्=पादुका' शिक्यविशेषश्च। 'नहिवृति—' (6-3-116) इति क्विबन्ते परतः पूर्वपदस्य दीर्घो भवति। एवं प्राणत् इत्यत्रापि। णत्वं प्राणदित्यत्राधिकमिति विशेषः।

4. 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हलन्तानां यथा वाचा निशा दिशा॥' इति वचनात् अपिशब्दघटकाकारस्य लोपः।

5. 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (6-3-122) इति पूर्वपदस्य दीर्घः। णत्वम्।

6. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति णत्वम्।

A. 'तन्मुच्यमानाऽस्त्वथ शुच्यदङ्गका भूयाः सुनद्धं बहुरक्तमंशुकम्।' धा. का. 2.61.